[A-24] Seat No: ________ **No. of Printed Pages: 02**

# Sardar Patel University

**M. A. (Final) (External) Examination**

**Monday Date: 25/04/2016**

**Session:** Evening **Time:** 02.30 P.M. to 05.30 P.M.

**PAPER-V:** Uttararamcharitam: Bhavabhuti,
Pancharatram: Bhasa, Ratnavali: Shree Harshavardhan: **SAN-505**

**Total Marks: 100**

પ્રશ્નઃ ૧ (અ) નીચેનામાંથી ગમે તે ત્રણ શ્લોકોનો અનુવાદ કરોઃ (૧૨)

१. विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च संमीलयति च।।

२. वितरतिः गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।
भवति च पुनर्भूयान्भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः।।

३. लीलोत्खातमृणालकाण्डकवलच्छेदेषु संपादिताः
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः।
सेकः शीकरिणा करेण विहितः कामं विरामे पुन-
र्यत्स्नेहादनरालनालनलिनपत्रातपत्रं धृतम्।

४. पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं
दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव।
शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रा-
न्किं व्याख्यातैर्व्रजति स पुनर्दूरमेह्येहि यामः।।

५. वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु किं वर्ण्यते
सुन्दस्त्रीमथनेऽप्यकुण्ठयशसो लोके महान्तो हि ते।
यानि त्रीण्यपराङ्मुखान्यपि पदान्यासन्खरायोधने
यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः।।

६. विना सीतादेव्या किमिव हि न दुःखं रघुपतेः
प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति।
स च स्नेहस्तावानयमपि वियोगो निरवधिः
किमेवं त्वं पृच्छस्यनधिगतरामायण इव।।

પ્રશ્નઃ ૧ (બ) નીચેનામાંથી ગમે બે સસંદર્ભ સમજાવોઃ (૦૬)

१. दारुणो देवनिर्घातः।
२. आनन्दग्रन्थिरेकोऽयमपत्यमिति पठ्यते।
३. ममैतस्मिन्दृष्टे हृदयमवधानं रचयति।
४. भगवन्वाल्मीके, परित्रायस्व परित्रायस्व। एष ते काव्यार्थः।

પ્રશ્નઃ ૨ एको रसः करुण एव।- સમજાવો (૨૨)

અથવા

પ્રશ્નઃ ૨ નીચેના વિશે સમીક્ષાત્મક નોંધ લખો (૨૨)

૧. ભવભૂતિનું પ્રકૃતિ નિરૂપણ
૨. ચિત્રદર્શનપ્રસંગ

(P.T.O.)

પ્રશ્ન: ૩ (અ) નીચેનામાંથી ગમે તે બે શ્લોકોનો અનુવાદ કરો: (૧૦)

१. राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः
सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः।
प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिं
कामः काममुपैत्वयं मम पुनर्मन्ये महानुत्सवः।

२. परिम्लानं पीनस्तनजघनसंगादुभयत-
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः सन्तापं वदति नलिनीपत्रशयनम्।।

३. बाणाः पञ्च मनोभवस्य नियतास्तेषामसंख्यो जनः
प्रायोऽस्मिद्विध एव लक्ष्य इति यल्लोके प्रसिद्धिं गतम्।
दृष्टं तत्त्वयि विप्रतीपमधुना यस्मादसंख्यैरयं
विद्धः कामिजनः शरैरशरणो नीतस्त्वया पञ्चताम्।।

४. उर्वीमुद्दामसस्यां जनयतु विसृजन् वासवो वृष्टिमिष्टा-
मिष्टस्त्रैविष्टपानां विदधतु विधिवत्प्रीणनं विप्रमुख्याः।
आकल्पान्तं च भूयात्समुपचितसुखः सङ्गमः सज्जनानां
निःशेष यान्तु शान्तिं पिशुनजनगिरो दुर्जया वज्रलेपः।।

પ્રશ્ન: ૩ (બ) નાટિકાનાં લક્ષણો જણાવી રત્નાવલીનું નાટિકા તરીકે મૂલ્યાંકન કરો (૨૦)

અથવા

પ્રશ્ન: ૩ (બ) નીચેના વિશે સમીક્ષાત્મક નોંધ લખો. (૨૦)

૧. સારિકાપ્રસંગ આલેખો
૨. રત્નાવલીનું પાત્રાલેખન

પ્રશ્ન: ૪ (અ) નીચેનામાંથી ગમે તે એક શ્લોકનો અનુવાદ કરો. (૦૫)

१. राजा वेष्टनपट्टघृष्टचरणाः श्लाघ्यप्रभूतश्रवा
वार्द्धक्येऽप्यभिवर्धमाननियमाः स्वाध्यायशूरैर्मुखैः।
विप्रा यान्ति वयःप्रकर्षशिथिला यष्टित्रिपादक्रमाः
शिष्यस्कन्धनिवेशिताञ्चितकरा जीर्णा गजेन्द्रा इव।।

२. पर्यस्तोऽस्य रथो हया नु चपलाश्चक्राक्षमा मेदिनी
तूणी क्षीणशरे त्वमस्य विगुणो ज्याच्छेदबन्ध्यं धनुः।
एता दैवकृता भवन्ति रथिनां युद्धाश्रया व्यापदो
बाणैरप्यवकृष्यते खलु परैः स्वाधीनशिक्षस्तु सः।।

પ્રશ્ન: ૪ (બ) નીચેનાંમાંથી ગમે તે બે સસંદર્ભ સમજાવો. (૦૫)

१. नष्टाः शरीरैः क्रतुभिर्धरन्ते।
२. अच्छलो धर्मः।
३. निधनमपि यशः स्यान्मोक्षयित्वा तु धर्मः।
४. सति च कुलविरोधे नापराध्यन्ति बालाः।

પ્રશ્ન: ૫ ભાસસમસ્યા વિશે સવિસ્તર નોંધ લખો (૨૦)

અથવા

પ્રશ્ન: ૫ સમવકારનાં લક્ષણો જણાવી પંચરાત્રનું સમવકાર તરીકે મૂલ્યાંકન કરો (૨૦)

—x—